Madhya Pradesh Board

QUESTION PAPER



aglasem.com

कुल प्रश्नों की संख्या – 23 संस्कृत कक्षा-10 वी पूर्णांक- 75

समय : 03घण्टेविषय –संस्कृत

निर्देशाः - (१) सर्वे प्रश्नाः अनिवार्याः सन्ति ।

(२)प्रश्नानां सम्मुखे अंकाः प्रदत्ताः ।

प्रश्न १ - उचित विकल्पं चित्वा लिखत् - (१ X ६ = ६)

(क) षष्ठी विभक्तेः रूपम् अस्ति-

(i) रामः (ii) रामस्य (iii) रामाय (iv) रामे

(ख) 'बालकम्' इत्यस्मिन् पदे विभक्तिः अस्ति -

(i) प्रथमा (ii) द्वितीया (iii) तृतीया (iv) चतुर्थी

(ग) 'गृहात्' इत्यस्मिन् पदे वचनम् किम्?

(i) एकवचनम् (ii) द्विवचनम् (iii) बहुवचनम् (iv) मृदुवचनम्

(घ) 'फलानि'इत्यस्मिन् पदे वचनम् अस्ति -

(i) एकवचनम् (ii) द्विवचनम् (iii) बहुवचनम् (iv) कोऽपि नास्ति

(ङ) अधोलिखितेषु अव्ययम् अस्ति -

(i) कथा (ii) करोति (iii) रूपं (iv) कदा

(च) 'अहं श्वः ग्रामं गमिष्यामि 'इत्यस्मिन् वाक्ये अव्ययम् अस्ति -

(i) अहं (ii) श्वः (iii) ग्रामे (iv) गमिष्यामि

प्रश्न २ – कोष्ठकात् चित्वा रिक्त स्थानि पूरयत् - (१ X ६ = ६)

(i) ..... जीवनं दुर्वहम् अस्ति। (अत्र / अपि)

(ii) वनम् इति पदस्य पर्याय पदं ..... अस्ति। (सलिलम्/काननम्)

(iii) 'गमिष्यति'इत्यस्मिन् धातुरूपे..... लकारः अस्ति। (लृट् /लट्)

(iv) 'भू'धातु लट्लकार प्रथमपुरुष बहुवचनस्य रूपम् ..... अस्ति। (भवन्ति /सन्ति)

(v) 'प्राचार्यः'इत्यस्मिन पदे..... उपसर्गः भवति। (प्र / प्रा)

(vi) 'अधिकारः'इत्यस्मिन् पदे ..... उपसर्गः अस्ति / (अधि/कारः)

प्रश्न 3 - युग्म मेलनं कुरुत् - (१ X ६ = ६)

अ	ब
(i) आदाय	(i) क्त्वतु प्रत्ययः
(ii) हसितुम्	(ii) आलस्यम्
(iii) गतवान्	(iii) ल्यप् प्रत्ययः
(iv) अत्र जीवितं जातम्	(iv) वक्सहस्त्रः
(v) सरसः तीरे वसन्ति	(v) दुर्वहम्
(vi) मनुष्याणा महानरिपुः	(vi) तुमुन् प्रत्ययः

प्रश्न 4 – शुद्ध वाक्यानां समक्षम् 'आम्' अशुद्ध वाक्यानां समक्षं 'न'इति लिखत् - (१ X ६ = ६)

(i) 'विद्या + आलयः'इत्यस्मिन् पदे दीर्घसन्धिः भविष्यति।

(ii) 'जगदीशः'इत्यस्मिन् पदे स्वर सन्धिः अस्ति।

(iii) 'सज्जनः'इत्यस्य सन्धि विच्छेदः सत्+जनः भवति।

(iv) समलम् पदे अव्ययीभावः समासः अस्ति।

(v) 'रामगतः' पदे द्वन्द्व समासः अस्ति।

(vi) द्वन्द्वसमासस्य उदाहरणम् 'रामलक्ष्मणौ'इति अस्ति।

प्रश्न 5 - एक पदेन उत्तर लिखत - (१ X ६ = ६)

(i) 'तुल्यवत्सला जननी'इत्यनयोः पदयोः विशेष्यपदम् किम्?

(ii) 'चतुरः वानरः'इत्यनयोः पदयोः विशेषणपदम् अस्ति।

(iii) 'वनम्'इति पदस्य पर्यायः अस्ति।

(iv) 'पत्नी'इत्यस्य पदस्य पर्याय पदम अस्ति।

(v) 'सुलभः'इत्यस्य विलोमपदम् अस्ति।

(vi) 'निर्मलम्'इत्यस्य विलोमपदम् अस्ति।

प्रश्न 6 - कविः किमर्थं प्रकृतेः शरणम् इच्छति ? (२)

अथवा

सुरभिः इन्द्रस्य प्रश्नस्य किमुत्तरं ददाति?

प्रश्न 7 - बाल भावत हिमकरः कुत्र विराजते ? (२)

अथवा

बुद्धिमती केन उपेता पितुर्गृहं प्रति चलिता ?

प्रश्न 8 - अस्माकं पर्यावरणे किं किं दूषितम् अस्ति ? (२)

अथवा

व्याघ्र किं विचार्य पलायितः?

प्रश्न ९ - रामःलवकुशौ कुत्र उपवेशयितुम् कथयति ? (२)

अथवा

कृषकः किं करोति स्म् ?

प्रश्न १० - वसन्तस्य गुणं कः जानाति ? (२)

अथवा

मयूर : कथं नृत्यमुद्रायां स्थितः भवति ?

प्रश्न ११ - रेखांकित पदमाधृत्य प्रश्न निर्माणं कुरुत- (कोऽपि द्वौ) (२)

(i) महानगरेषु वाहनानां अनन्ताः पंक्तयः धावन्ति ।

(ii) बालकानाम् माता सुरभिः आसीत्।

(iii) बुद्धिमती उपेटया पुत्रीं प्रहतवती।

प्रश्न १२ - अधोलिखितानि वाक्यानि कः कं प्रति कथयति । (कोऽपि द्वौ) (२)

(i) भवान् कुतः भयात् पलायितः ।

(ii) भवतः । अपूर्व खलु नामधेयम् ।

(iii) अनृतं यदसि चेत् काकः दशेत् ।

13 प्रश्न १३ - प्रश्न पत्रे समागतान् लोकान् विहाय स्वपाठ्यपुस्त... एकं सुभाषित लिखत । (१)

14 प्रश्न १४ -अधोलिखितानां पदानां अर्थ कोष्ठकात् चित्वा लिखत्-(१)

(i) ददर्श - (दर्शितवान् , दृष्टवान्)

(ii) मुच्यते - (मुक्तो भवति, भग्नो भवति)

(iii) ईक्षते - (पश्यति, इच्छति)

(iv) ययौ - (याचितवान्, गतवान्)

15 प्रश्न १५ - पदत शब्दैः रिक्तस्थान पूर्तिकुरुत - (कोऽपि चत्वारः) (१/२ X ४= २)

(भृशम्, एवं, कृष्णः, राजपुत्रः, सदा, प्रथमो)

(i) पर्यावरणस्य संरक्षणम् ..... प्रकृतेः आराधना।

(ii) इदानीं वायुमण्डलं ..... प्रदूषितमस्ति।

(iii) काकः ..... भवति ।

(iv) तत्र राजसिंह नाम ..... वसतिस्म।

(v)..... समयस्य सदुपयोगः करणीयः।

(vi) आचारः.....धर्मः।

16 प्रश्न १६ - अधोलिखितानि वाक्यानि घटना कुमानुसारेण योजयत - (१/२ X ४= २)

(i) व्याघ्रः व्याधमारी इयमिति मत्वा पलायितः। (४)

(ii) मार्गे सा एकम् व्याघ्रम् अपश्यत् ।(२)

(iii) प्रत्युत्पन्नमतिः सा शृगालम् आक्षिपन्ती उवाच ।(३)

(iv) बुद्धिमती पुत्रद्वयेन उपेता पितुर्गृहं प्रति चलिता। (१)

17 प्रश्न १७ - यथा निर्देशम् उत्तरत - (कोऽपि द्वौ) (१ X २ =२)

(i) 'जानाम्यहं तस्य नाम धैयम्' अस्मिन् वाक्ये कर्तृपद किम् ?

(ii) 'किं कुपिता एवं भणति उत प्रकृतिस्था' अस्मात् वाक्यात् 'हर्षिता' इति पदस्य विपरीतार्थकं पदं चित्वा लिखत ।

(iii) 'वयसस्तु न किञ्चिदन्तरम्'- अत्र आयुषः इत्यर्थे किं पदं प्रयुक्तम् ?

18 प्रश्न १८ -अधोलिखित गद्यांशं सम्यक् पठित्वा प्रश्नानाम् उत्तराणि लिखत - (१ X ३ =३)

'इति श्रुत्वा व्याधमारी काचिदियमिति मत्वा व्याघ्रो भयाकुल चितो नष्टः। निजबुद्ध्या विमुक्ता सा भयाद् व्याघ्रस्य भामिनी। अन्योऽपि बुद्धिमांल्लोके मुच्यते महतो भयात्। भयाकुलं व्याघ्रं दृष्ट्वा कश्चित् धूर्तः शृगालः हसन्नाह-"भयान् कुतः भयात् पलायितः?"

प्रश्न (i) व्याघ्रो कयं नष्टः ?

(ii) सा भामिनी व्याघ्रस्य भयात् कथं विमुक्ता?

(iii) शृगालः किम् आह ?

अथवा

"सर्वेष्वपत्येषु जननी तुल्य यत्सला एव। तथापि दुर्बले सुते मातुः अभ्यधिका कृपा सहजैव" इति। सुरभिवचनं श्रुत्वा भृशं विस्मितस्याखण्डलस्यापिहृदयमद्रवत्। सच तामेवमसान्त्वयत्- "गच्छ वत्से । सर्वं भद्रंजायेत।" अचिरादेव चण्डवातेन मेघरवैश्च सह प्रवर्षः समजायत्। लोकनां पश्यताम्एव सर्वत्र जलोप्लवः सञ्जातः।कृषकः हर्षातिरेकेण कर्षण विमुखः सन् वृषभौ नीत्वा गृहमगात्।

प्रश्न (i) सर्वेषु अपत्येषु जननी कीदृशी ?

(ii) कीदृशे सुते मातुः अम्बिका कृपा सहजैव ?

(iii) सर्वत्र कः सज्जातः ?

प्रश्न १९-अधोलिखित पद्यांशाधारित प्रश्नानां उत्तराणि लिखत - (१ X 3 =3)

कज्जलमलिनं धूमं मुञ्चति शतशकटीयानम् ।

वाष्पयानमाला संधावति वितरन्ती ध्यानम् ॥

यातानां पंक्त्यो ह्यनन्ताःकठिन संसरणम् । शुचि.- ॥

प्रश्न (i) शतशकटीयानं किं मुञ्चति ?

(ii) वाष्पयानमाला कथं संधावति ?

(iii) संसरणं कथम् ?

अथवा

आलस्यं हि मनुष्याणां शरीरस्थो महान् रिपुः।

नास्त्युद्यम समो बन्धुः कृत्वा यं नावसीदति ॥

प्रश्न (i) महान् रिपुः कः अस्ति ?

(ii) केन समः बन्धुः नास्ति ?

(iii) कं कृत्वा नरः नावसीदति ?

प्रश्न २० - अधोलिखित नाट्यांशं सम्यक् पठित्वा प्रश्नानाम् उत्तराणि लिखत - (१ X 3 =3)

(सिंहासनस्थः रामः। ततः प्रविशतः विदूषकेनोपदिश्यमानमार्गौ तापसौ कुशलवौ)

विदूषकः - इत इत आर्यौ ।

कुशलवौ - (रामम् उपसृत्य प्रणम्य च) अपि कुशलं महाराजस्य ?

रामः - युष्मद्दर्शनात् कुशलमिव। भवतोः किं वयमत्र कुशलप्रश्नस्य भाजनमेव, न पुनरतिथिजनसमुचितस्य कण्ठाश्लेषस्य । (परिष्वज्य) अहोहृदयग्राही स्पर्शः। (आसनार्धमुपवेशयति)

उभौ- राजासनं खल्वेतत्,न युक्तमध्यासितुम्।

रामः - सव्यवधानं न चरित्र लोपाय। तस्मादङ्कव्यवहित मध्यास्यतां सिंहासनम् ।

(अङ्कमुपवेशयति)

प्रश्न (i) ततः को प्रविशतः? (ii) अहो कथं स्पर्शः?

(iii) राजासनं खल्वेतत् किं न युक्तम् ?

अथवा

भयाकुलं व्याघ्रं दृष्ट्वा कश्चित धूर्तः शृगालः हसन्नाह-" भवान् कुतः भयात् पलायितः?

व्याघ्रः - गच्छ गच्छ जम्बुक त्वमपि कञ्चिद् गूढप्रदेशम् । यतो व्याघ्र मारीति या शास्त्रे श्रूयते तयाहं हन्तुमारब्धः परं गृहीतकर जीवितो नष्टःशीघ्रं तदयतः।

शृगालः - व्याघ्र । त्वया महत्कौतुकम् आवेदितं यन्मानुषादपि बिभेषि ?

व्याघ्रः - प्रत्यक्षमेव मया सात्मपुत्रायैकैकशो मामतुं कलहायमानोंचपेटया प्रहरन्ती दृष्टा ।

प्रश्न (i) शृगालः कीदृशः आसीत् ? (ii) व्याघ्रः कया प्रहरन्ती दृष्टा ?

(iii) व्याघ्रः कस्मात् बिभेति ?

QUESTION PAPERS

GET PREVIOUS YEAR QUESTION PAPERS FOR ALL CLASSES FOR CBSE, ISCSE, ISC AND ALL ALL STATE BOARDS HERE AT AGLASEM.COM

BOARD WISE

- Andhra Pradesh Board Question Papers
- Assam Board Question Papers
- Bihar Board Question Papers
- Chhattisgarh Board Question Papers
- Goa Board Question Papers
- Gujarat Board Question Papers
- Haryana Board Question Papers
- Himachal Pradesh Board Question Papers
- J&K State Board Question Papers
- Jharkhand Board Question Papers
- Karnataka Board Question Papers
- Kerala Board Question Papers
- Madhya Pradesh Board Question Papers
- Maharashtra State Board Question Papers
- Manipur Board Question Papers
- Meghalaya Board Question Papers
- Mizoram Board Question Papers
- Nagaland Board Question Papers
- Orissa Board Question Papers
- Punjab Board Question Papers
- Rajasthan Board Question Papers
- Tamil Nadu Board Question Papers
- Telangana State Board Question Papers
- Tripura Board Question Papers
- Uttarakhand Board Question Papers
- Uttar Pradesh (UP) Board Question Papers
- West Bengal (WB) Board Question Papers